# मध्वमुनिप्रतापाष्टकम्

क्वचित्सुरांशास्ति सुरांगनाः क्वचित्
क्वचिच्च गंधर्वपतीनृषीन् क्वचित् ।
क्वचित्पितृन् क्वापि नृपान्नरांक्वचि-
च्छुभानयं मध्वमुनिः प्रतापवान् ॥ १ ॥

क्वचित्प्रभुं स्तौति समीक्षते क्वचित्
क्वचित्स्मरन्नृत्यति गायति क्वचित् ।
क्वचित्तमाराधयतीश्वरं क्वचि-
न्नमत्ययं मध्वमुनिः प्रतापवान् ॥ २ ॥

क्वचिद्धरेर्जीवजडतिभिन्नतां
क्वचित्प्रभोः सर्वगुणैश्च पूर्णताम् ।
क्वचिच्च तस्याखिलदोषशून्यतां
वदत्ययं मध्वमुनिः प्रतापवान् ॥ ३ ॥

क्वचिच्च विष्णोरुरुचित्ररूपतां
क्वचिच्च मुक्तखिलजीवयंतृताम् ।
क्वचिच्च तस्याव्ययचिन्मयाकृतिं
व्यनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ४ ॥

क्वचित्स्मृतीः क्वापि पुराणसंहिताः
प्रवक्ति सूत्रं क्वचिदागमोक्तिभिः ।
क्वचिच्च धर्मं चरति क्वचिच्च तं
ब्रवीत्ययं मध्वमुनिः प्रतापवान् ॥ ५ ॥

क्वचिच्च चार्वाककणादगौतम्-
प्रभाकराद्वैतितथागतादिकैः ।
कृतं मतं युक्तिशतैर्विखंडयन्
विभात्ययं मध्वमुनिः प्रतापवान् ॥ ६ ॥

परान्पराभावयति क्वचित्क्वचि-
न्निजांकथायां कुशलीकरोत्ययम् ।
क्वचिद्बुधांवैष्णवमार्गमागतान्
पुनात्ययं मध्वमुनिः प्रतापवान् ॥ ७ ॥

क्वचित्समस्तागमनिर्णयोदिताः
कृतीः कृता व्याकुरुते सभांतरे ।
प्रह्मष्टरोमा नृहरौ क्वचिन्मनो
युनक्त्ययं मध्वमुनिः प्रतापवान् ॥ ८ ॥

इदं प्रतापाष्टकमच्युतप्रिय-
श्रुतिप्रतीतामलमध्वयोगिनः ।
यतिस्तदीयोऽकृत वादिराज
उदारधीस्तस्य कृपाफलाप्तये ॥ ९ ॥

इति श्रीमद्वादिराजपूज्यचरणविरचितं

मध्वमुनिप्रतापाष्टकं संपूर्णम्

भारतीरमणमुख्यप्राणांतर्गत श्रीकृष्णार्पणमस्तु